International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

# संस्कृतमहाकाव्येषु पुराणेतिहासांशाः निरूपणम्

Dr. SK. Nagamastanvali
Guest Faculty
Dept. of Puranetihasa
National Sanskrit University
Tirupati
Cell: 9492606567

व्यासाय विष्णुरुपाय व्यासरूपाय विष्णवे। ऋग्यजुः सामाथर्ववेदा भारतीय संस्कृतेः सम्भयायाश्च ज्ञानाय प्राचीनधर्मपरम्परायाश्च परिचयाय यथा परमोपादेया मन्यन्ते। विद्वद्भिस्तर्थैव पुराणोपपुराणानि भारतीयसंस्कृतेः सभ्यताया धर्मस्य परम्परायाश्च स्वरूपाण्येवात्र न काचित् संशीतिरिति।

**वेदैर्थाधिकं मन्ये पुराणार्थं वरानने।**

**वेदाः परतिष्ठिताः सर्वे पुराणे नात्र संशयः॥1**

अर्धनारीश्वरत्वम् –

शिवः स्वकीयमर्धभागं स्त्रीरूपत्वेन धृतवान् अयं प्रसङ्गः अधीनिर्दिष्टश्लोके परमृष्टः सृष्टे निर्विग्धपूर्वकसमाधनाय ब्रह्मा शङ्करं प्रति अतपस्यत्। तस्मिन् समये सृष्टिः स्त्रीपुंसाभ्याम् एव सम्भवतीति शिवः स्त्रीपुरुषरूपेण स्वस्य तनुं दर्शयामास। अतः शक्तिः पृथक्कृत्य ब्रह्मा तामाराध्य सृष्टिम् उपचक्रमे। तदनु शहकरः तां शक्तिं पुनः आत्मसात्कृत्य अन्नर्जगाम। ईश्वरात् बहिरागता शक्तिः ब्रह्मणः प्रार्थनामनुसृत्य दक्षप्रजापतेः पुत्रिकारूपेण सञ्जाता तां दाक्षायणीं दक्षः शिवाय ददौ। अयं प्रसङ्गः पुराणश्लोकेषु लक्ष्यते।

**इह सनियमाः सुरापगायामुषसि सयावकसव्यपादरेखा।**

**कथयति शिवयोः शरीरयोगं विषमपदापदवीविवर्तनेषु॥2**

**ईश्वरप्रशस्तिः –**

प्राग्भावत् – स्वभावतः अन्यन्तपरिशुद्धः अतः शिवः इत्युच्यते। समस्तकल्याणगुणमूर्तिः शिवः शं सुखम् इत्युत्पत्तिः। सर्वकर्तृत्वम्, सर्वज्ञत्वम्, पूर्णत्वम्, व्यापकत्वं शक्तयः शिवे अस्ति। महाप्रलयकाले स्थावरजडमात्मिका सृष्टिः स्तब्धा भूत्वाऽपि तत्सद्ब्रह्मेति यच्छ्रुत्या यदेकं प्रतिपाद्यते। निराकारः परमात्मा ईश्वरशब्देन कथ्यते बुधैः।

अयं परमपुरुषः एव ईश्वरः शिवः शम्भुः, महेश्वरः, महादेवः, परमेश्वरः इति नामभिः प्रकीर्तिताः। शिवेतिमङ्गलं नाम उच्चरन्ति जीवाः पवित्रा भवेयुः तान् लक्ष्मीः इह परत्रापि अनुयाति। जीवैः भोक्तम् ऐश्वर्यानन्दविलासभोगाः ईश्वराराधनफलमेव ज्ञातव्यम् इति। ईश्वरस्य माहात्म्य पौराणिकदृष्ट्या सूचितमस्ति। यथा शिवप्रसङ्गसन्दर्भे कविभिः काव्येषु सूचितं यथा।

**अध्याहारः स्मरहरशिरश्चद्रशेषस्य शेष –**

**स्याहेर्भूयः फलसमुचितः काययष्टीनिकायः।**

**दुग्धाम्बोधेर्मुनुचुलुकनत्रासनाशाभ्युपायः**

**काव्यव्यूहः क्व जगति न जगर्त्यदः कीर्तिपूरः॥3**

**चन्द्रधारणम् –**

इन्दुः मौलौ यस्य सः इन्दुमौलिः, चन्द्रशेखरः, शिवः चन्द्रं धरति। अयं विषयः पौराणिकः। शब्दोऽर्थं कविभिः काव्येषु प्रयुज्यते। ब्रह्ममानसपुत्रः

दक्षप्रजापतिः सप्तविंशति पुत्री चन्द्राय ददौ। चन्द्रः रोहिण्यां अनुरक्तोऽभवत्। इतराः नोत्सुवः ताः एतद्विषयं दक्षाय न्यवेदयन्। कपितः दक्षः राजयक्ष्मरोगेण पीडितः भव इति चन्द्रं शेपुः यक्ष्मरोगेण क्षीयमाणः चन्द्रः ईश्वरं शरणं प्राप्य तेन रक्षितः। वियोगदुःखिताः दक्षपुत्रिकाः जनकं शरणं व्रविरे। दक्षोऽपि स्वजामातरं मुमोच इति शङ्करं प्रपेदे। ईशानः शरणागतं प्राप्तं चन्द्रं मोचयितुं नाङ्गीकृतवान्। विष्णोः वाक्यानुसारं तथा ईश्वरः स्वशिरसि धारिताद् चन्द्रात् छाया चन्द्रं सृष्ट्वा दक्षाय ददौ। वीतरोगभयः चन्द्रः शिवस्य शिरसि अलङ्कृतः अतः ईशः चन्द्रशेखरः इति क्रीर्तितः। काव्येषु एवं दृश्यते –

**एवं स बिभ्रद्विधुमुक्तमाङ्गे गिरीन्द्रपुत्रीपतिशेषधीशम्।**

**अश्नाति घोरं विषमब्धिजन्म धत्तेभुजङ्गञ्च विमुक्तशङ्कः॥4**

दक्षिणामूर्तिः –

दक्षिणामूर्तिः ईश्वरस्य दक्षिणामूर्तित्वं घोषयति। दक्षिणामूर्तिः दक्षिणादिङ्मुखी मूर्तिः यस्य सः इत्यनेन दक्षिणाभिमुखः शङ्करः दक्षिणामूर्तिरित्युच्यते। सनकादयः महर्षयः ज्ञानार्थं शङ्करं प्रति तपः चक्रुः। ज्ञानप्रदानाय शङ्करः वटुतरोधरः तेभ्यो दर्शनं ददौ। तत्र चिन्मुद्रां प्रदर्शयन् मौनुपदेशमयच्छत्। अयमंशः किरातार्जुनीये उद्धृतो भारविणा।

**दक्षिणां प्रणतदक्षिणामूर्तितत्वतः शिवकरीमविदित्वा।**

**रागिणापि विहिता तव भक्त्या संस्मृतिर्भवभक्त्यभवाय॥5**

पशूनां पतित्वम् –

पश्यन्तीति पशवः तेषां पतिः पशुपतिः शङ्करः। पुराणप्रसिद्धमिदं पदम्। ईशः पशुपतिः, इति नाम्नां कीर्तितः। अतः कारणमाह – त्रिपुरासुरसंहारसमये शङ्कराज्ञया देवदानवादयः पशुभावं प्राप्नुवन्। परमेश्वरानुग्रहेण ते पाशुपतव्रतमवलम्ब्य पशुभावात् विमुक्ताः अभवत्। रुद्रः तान् पशुभावात् मोदयामास। अतः कारणेन रुद्रः पशुपतिः भवति। ब्रह्मादिस्तम्बपर्यन्ताः संसारवर्तिनः जीवाः पशवो भवन्ति। शलिनः पशवः परिकीर्त्यन्ते। महेशः तेषां पतिः मायापाशैः बद्धाः जीविनः परमेशमुपास्य चतुर्विंशतितत्त्वेभ्यः विमुक्ताः अभवन्। अयमंशः भारविना उल्लिखितं यथा –

**तमाशु चक्षुः श्रवसां समूहां मन्त्रेण तक्ष्योंदयकारणेना।**

**नेता नयेनेव परोपजापं निवारयामास पतिः पशूनाम्॥6**

गौरीशक्तिस्वरूपम् –

इतः पूर्वमेव शक्तित्रयात्मिकाभवतीति तासु सर्वप्रथमं गौरीनामिका शक्तिः विचार्यते। गौरी शब्दस्य अर्थः प्रीता, निर्मला, निर्लिप्ता, परब्रह्मा इति। तस्यात्मनः शक्तिरियं गौरी प्रकीर्तिता इति व्युत्पत्तिपूर्वकमर्थो लभ्यते। तस्य अयं विषयः कण्ठतः उच्यते नैषधीयचरितादिषु काव्येषु –

**गौरीव पत्याः सुभगा कदाचित् कर्त्रीथमप्यर्थतनूसमस्याम्।**

**इतीव मध्ये कुरुते विधाता सीमाऽऽवलीमेचकसूत्रमस्यः॥7**

**शिवा –**

शिवा कल्याणरूपा शिवप्रिया शिवेति प्रकीर्तिता। स्वयं निर्वाणदात्री या सा शिवा प्रकीर्तिता।

**अवामा वामार्द्धे सकलमुभयाकाराधातनात्।**

**द्विधाभूतं रूपं भगवदभिधेयं भवति यत्॥**

**तदन्तस्तन्त्रं मे स्मरहरमयं सेन्दुममलं।**

**निराकारं शश्वज्जप नरपते! सिध्यतु स ते॥8**

एवं अनेकानेक संस्कतमहाकाव्येषु पौराणिक विषयाणां विवरणं वर्तते। वस्तुतः इदानीं सर्वेषामपि पौराणिकविषयाणामुपरि विचर्यमानः भवितव्यमेव। तस्मात् लोके जनाः काव्येष्वपि अनेकपुरातनसांस्कृतिकदार्शनिकराजनैतिकाध्यात्मिकविषयाणां विवरणमस्ति। सम्प्रति काले पुराणज्ञानं सर्वेषामपि आवश्यमेव। पुराणानि सार्वकालिकानि तस्मात् एतत् शोधांशः समाजे सर्वेषामपि उपयोगकं भविष्यतीति चिन्तयित्वा विरमति विस्तरात्।

International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

References

1. नारदपुराणम्
2. कारातार्जुनीयम् – 5.40
3. नैषधीयचरितम् – 12.57
4. नैषधीयचरितम् – 22.117
5. किरातार्जुनीयम् – 18.27
6. किरातार्जुनीयम् – 16.64
7. नैषधीयचरितम् – 7.83
8. नैषधीयचरितम् – 14.85